योग्यताज्ञानस्य शाब्दं प्रतिकारणत्वविचारः

१३२३   ९९

न्या प योगज ज्ञान
साधक

२७०

नं० १२२३

११८

योग्यता०
१

श्रीकृष्णायनमः अथयोग्यतानिर्णयःदशायाशाब्दबोधानुदयाद्योग्यताज्ञानस्यापिशाब्दधीहेतुताक
ल्प्यतात्रतद्धर्मावच्छिन्ननिष्ठतत्संबंधावच्छिन्नप्रतियोगिताकाभावप्रतियोगितानवच्छेदकत्वंतद्ध
र्मावच्छिन्नविशेष्यकतत्संसर्गकतद्धर्मावच्छिन्नप्रकारकान्वयबोधोपयिकीतस्यमविच्छिन्नयोर्यो
ग्यताइतिप्राचः नचसेकत्वावच्छिन्नदुग्धादिकरणकसेकजलादिकरणकत्वत्वावच्छिन्नाभावस
त्वात्सेकत्वाद्यवच्छिन्नजलकरणकत्वाद्यवच्छिन्नयोर्योग्यत्वानुपपत्तिरितिवाच्यंतद्धर्मावच्छि
न्ननिष्ठस्यस्यतद्धर्मावच्छेदेनवर्त्तमानत्वार्थकत्वात्नवादिकरणकत्वत्वाद्यवच्छिन्नाभावस्यसेक
त्वाद्यवच्छेदेनावर्त्तमानत्वात्अनुपपत्त्यभावात् नचैवमवच्छेदकोच्छेदेभान्वयेपितयोर्योग्यत्वाप
त्तिरितिवाच्यं: अवच्छेदकापच्छेदेनान्वयबोधत्वंसंकलव्यापकीभूतविशेषणतादीनामेवसंस
र्गतयातद्दृशसंबंधेनचजलकरणकत्वादेःसेकाद्यवच्छिन्नतयासेकत्वाद्यवच्छेदेनैवतत्संबंधा

श्री०
१

वच्छिन्नतदभावसत्वेनाभेदसंसर्गतयातादृशसंबंधेनच तल्लकरणकत्वादेः सेकाद्यवच्छिन्नतयासेकत्वा
द्यवच्छेदेनैवतत्संबंधावच्छिन्नतदभावसत्वेनायस्याभावात् । नथास्तु । नकेऽप्ययोग्यता न शाब्दबो
धोपयोगिनी जलकरणकत्वत्वं सेकनिष्ठाभावप्रतियोगितानवच्छेदकमित्येतादृशयोग्यताज्ञानस्य से
कोनजलकरणकइत्याकारकायोग्यताज्ञानप्रतिबध्यत्वेमानाभावात् तादृशयोग्यतानिर्णयकाले
पितथाविधयोग्यताज्ञानोत्पत्त्यापयसासिंचतीत्यादिवाक्यात् शाब्दबोधापत्तेः किंतु तद्धर्मावच्छि
न्नविशेष्यकतत्संसर्गकतद्धर्मावच्छिन्नप्रकारकान्वयबोधे तद्धर्मावच्छिन्नस्यतत्संसर्गेण
तद्धर्मावच्छिन्नवत्त्वमेवयोग्यता सेकोनजलकरणकइत्येतादृशायोग्यतानिर्णयकालेसेक
त्वावच्छिन्ने जलकरणकत्वावच्छिन्नवत्त्वावगाहितः सेकोनलकरणकइत्येतादृशयोग्यताज्ञा
नस्यानुत्पत्त्या सेकत्वावच्छिन्नविशेष्यकजलकरणकत्वावच्छिन्नप्रकारकशाब्दबोधस्याना

यत्तुऽउक्तयोग्यतापेक्षया लघुशरीरतया यादृशयोग्यताज्ञानस्यैव हेतुत्वमुचितं योग्यतायासं
शयनिश्चयसाधारणज्ञानमात्रमेव हेतुः सर्वत्र शाब्दबोधपूर्वमेकपदार्थेऽपरपदार्थवत्त्वादि
रूपयोग्यतायाः निर्णेतुमशक्यत्वात् एवं च संसर्गताद्यवच्छिन्नविशेष्यकजलकरणकत्वत्वाद्यव
च्छिन्नप्रकारक[illegible]विशेषणताविशेष्यादिसंसर्गकशाब्दबुद्धित्वावच्छिन्नं प्रति तथाविधज्ञान
त्वेन योग्यताज्ञानहेतुता बोध्या। सामानाधिकरण्यमात्रावगाहियोग्यताज्ञानस्य तथाविधा
योग्यतानिर्णयाप्रतिबध्यतया तादृशायोग्यतानिर्णयकाले नादृशयोग्यताज्ञानादवच्छे
दकावच्छेदेन शाब्दबोधापत्तिवारणायावच्छेदकावच्छेदेन शाब्दबोधे तादृशयोग्यताज्ञानस्यैव
हेतुता वाच्या सामानाधिकरण्येन शाब्दबोधे च सामानाधिकरण्यमात्रा[illegible]वगाहिनोऽव
च्छेदकत्वावगाहिनश्च योग्यताज्ञानस्य हेतुतोभयविधयोग्यताज्ञानस्यैव तथाविधयोग्यताज्ञा

नप्रतिबध्यत्वात् तदुभयोश्चानुगतत्वेनैव हेतुतावाच्या यद्यप्रामाण्यग्रहाभावादिनिवेशा
नुरोधेन संसर्गांशेन पर्याप्तिनिवेशः अन्यथा तु कार्यतावच्छेदककोटौ वैशिष्ट्यं निवेश्य भिं
न्नभिन्नमेव हेतुत्वं तज्ज्यं उक्तदिशा च स्वजनकतायां स्वविरोधिबाधाप्रतिबध्ययोग्यता
ज्ञानव्यावर्तकविशेषणान्तरदानमपि बोध्यं अथ सेकत्वाद्यवच्छिन्नविशेष्यकजलकर
णकत्वत्वावच्छिन्नप्रकारप्रकारकशाब्दबुद्धौ सेकत्वाद्यवच्छिन्नविशेष्यकजलकर
णकत्वाभावप्रकारकनिर्णयत्वेनायोग्यतानिर्णयस्य प्रतिबंधकत्वकल्पनेनैव ताद्दृ
शयोग्यतानिर्णयदशायां तथाविधशाब्दबोधवारणसंभवात्। किमुपदर्शितयोग्यताज्ञानहे
तुतया न चोपदर्शितायोग्यतानिर्णयत्वापेक्षया लघ्वायप्यसेकत्वाद्यवच्छिन्नविशेष्यक
जलकरणकत्वत्वावच्छिन्नप्रकारकज्ञानत्वेनैव हेतुत्वकल्पनमिति वाच्यं सेको जल

करणाकरस्पनीतमानारोसिको नजलकरणकद्दू स्यादिनिर्णयाभावहेतुताया आवश्यकत्वात् तत्र
लौकिकान्यतद्विशिष्टबुद्धित्वावच्छिन्नं प्रसेवतत्भावनिर्णयाभावत्वेन हेतुतया शाब्दबोधस्य स्थले
बाधनिर्णयाभावस्यानिरिक्तकारणत्वाकल्पनेन कारणतावच्छेदकगौरवस्याकिंचित्करत्वात् मेव। बाधनि
र्णयकालेय्याहार्यप्रत्यक्षोदयेन प्रत्यक्षस्यात्मीयप्रतिबंधकतायाचाक्षुषत्वादौ नामुतज्जकत्वस्यावश्य
कत्वात्। तदनुरोधेना लौकिकतद्विष्ठचाक्षुषत्वादिक प्रत्यक्षस्थलेबाधाभावजन्यतावच्छेदकमुपगन्त
व्यं· तथाच शाब्दबोधस्थमेस्वतंत्रहेतुताकल्पनस्यावश्यकतया बाधनिर्णयाभावत्वमपेक्ष्य लघी
यसा योग्यताज्ञानत्वेन हेतुता कल्प्यते। अथबाधनिर्णयप्रतिबंधकतायां संशयनिर्णयसाधारण
प्रामाण्यज्ञानत्वावच्छिन्नस्यैवोत्तेजकता बाधनिर्णयदशायां तत्राप्रामाण्यस्य निर्णये संशये च
विशिष्टत्वाधुसत्त्वेः संशयसाधारणयोग्यताज्ञानहेतुतायामप्रामाण्यनिर्णयत्वावच्छिन्नाभाय

निवेशनीयः योग्यताज्ञाने प्रामाण्यसंशयदशायामाहार्यबोधोत्पत्तेः एवं पदतांभवत्तां तद्भाववद्विशेष्यकत्वा
वच्छिन्नतत्प्रकारकत्वाभावाप्रकारकतदभाववद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वप्रकारकज्ञानाम
वविशिष्टतदप्रकारकतदभावप्रकारकज्ञानाभावत्वेनापि विपरीतमेवं गौरवं योग्यताज्ञाने हेतुतामतेन
त्प्रकारकज्ञाननिश्चयेत्वापत्तेः पातत्प्रकारकज्ञानाप्रामाण्यनिर्णयत्वस्य शरीरगौरवादिति चेन्न त
द्रूपावच्छिन्नाभाववत्तनिर्णयप्रतिबंधकतायां तद्रूपावच्छिन्नाभावाभाववत्त्वेन तद्रूपावच्छिन्नमवगा
हमानस्य वद्रूपावच्छिन्नाभावाभाववति तद्रूपावच्छिन्नभावप्रकारकमिसाकारकाप्रामाण्यग्रहस्य त
द्रूपपुरस्कारेण तद्रूपावच्छिन्नाभावाभाववति तद्रूपावच्छिन्नभावप्रकारकमिसाकारकाप्रामाण्य
ग्रहस्य तद्रूपपुरस्कारेण तद्रूपावच्छिन्नमवगाहमानस्य तद्रूपावच्छिन्नवति तद्रूपापवच्छिन्नाभा
वप्रकारकमित्याकारकाप्रामाण्यग्रहस्य तद्रूपपुरस्कारेण तद्रूपावच्छिन्नमवगाहचाभावो निवे

योग्यता०
५

शनीय इति अभावद्वयनिवेशाद्गौरवमिति प्रकारविशेषनिवेशस्यावच्छेदकतया तादृशाप्रामाण्यग्रहयो
रननुगमासंभवात्। योग्यताज्ञानहेतुतायाश्च तदभाववति तत्प्रकारकमित्याकारकस्यैकविधस्यैकध
स्यैवाप्रामाण्यग्रहस्याभावनिवेशाल्लाघवं। एवं बाधनिश्चयप्रतिबंधकतायां अनुयोगितासंबंधाव
च्छिन्नप्रतियोगिताकतदभाववत्त्वाभावेऽनुयोगितासंबंधेन तत्प्रकारकमप्रेतादृशाप्रामाण्यग्रहा
भावस्याधिकस्य निवेशनीयतया गौरवं। एवं तत्प्रकारकशाब्दबुद्धौ तदत्यंताभावप्रकारिकायास्त
द्वदन्योन्याभावप्रकारिकायाश्च बाधबुद्धेः प्रतिबंधकत्वं भवतीवाच्यं। तदपेक्षया एकविधस्य तत्प्र
कारकयोग्यताज्ञानस्य हेतुत्वकल्पनमुचितं। एवं तदभावव्याप्यवत्तानिर्णयाभावादीनामपि हे
तुता। योग्यताज्ञानहेतुतामते तदभावव्याप्यवत्तानिर्णयादिकालेऽपि योग्यताधीविलंबादेव
शाब्दबोधविलंबादिसादित्यादिमाहालाघवं। अत्राहुः प्रत्यक्षस्थले इच्छाया उत्तेजकता

राम०
५

नुरोधेनचावस्तुषत्वादीनां प्रतिबध्यतावच्छेदकत्वोपगमेऽनुमित्यादिस्थलेऽनुमितित्वादीनांनानाधर्मा
णांतथात्वापेक्षया लाघवात्परोक्षत्वजातेरेवबाधादिप्रतिबध्यतावच्छेदकत्वमुपपद्यते।एवंचानुमित्यादि
स्थलोपप्रतिबंधकतयैवोपपत्तेः अत्र शाब्दस्थले पृथक्प्रतिबंधकत्वमेवनास्तीति नोपदर्शितम् ग्येरवाकाथः
यत्त्वनुमित्यादिस्थलेपिबाधबुद्धेः पृथक्प्रतिबंधकत्वमेवनास्तिशाब्दस्थलेयोग्यताज्ञानहेतुत्वे
कल्पनीये।नुमित्यादिसाधारणतत्प्रकारकपरोक्षत्वावच्छिन्नंप्रत्येवतत्प्रकारकज्ञानत्वेनहेतुत्वकल्पना
त्बाधबुद्धिकालेतत्प्रकारकज्ञानाभावादेवानुमित्यादेरपिवारणसंभवात्।नचतत्प्रकारकज्ञानकालेसि
षिसत्त्वात्तदानुमित्यनुदयेनानुमितौतत्प्रकारकज्ञानहेतुत्वमसंभवदुक्तिकमेवेतिवाच्यं।सिषाधयिषाविर
हविशिष्टसिद्धेःप्रतिबंधकत्वादिति
यालिकायापवानुमितिप्रतिबंधकतयासंशयात्मकारकज्ञानस्यानुमितिजनकत्वबाधकपरिहारात् सा
ध्यसंदेहस्यपक्षतात्ववादिनांप्राचामप्यनुमतमेवैतदिति।तदसत्।अनुमितौसाध्यप्रकारकज्ञानस्यहे
तुत्वेपत्रप्रथमतएवव्याप्यवत्तापरामर्शः तदुत्तरंविशेषदर्शनसत्त्वेनसाध्यसंदेहानुदयात्।साध्यनिर्ण

योग्यता०
५
5

योत्पत्तौ च सिषाधयिषापि पायं क्षतां विना।नुमित्युपपादनासंभवात्।वस्तुतस्तु तत्प्रकारकज्ञानं विनैव तत्प्र
रकस्मरणोत्पादस्य सर्ववादिसिद्धत्वात्। तत्प्रकारकपरोक्षत्वावच्छिन्नं प्रति तत्प्रकारकज्ञानत्वेन हेतुत्व
मसंदेव। न च परोक्षानुभवत्वस्य तत्प्रकारकज्ञानजन्यतावच्छेदकत्वान्नादोष इति वाच्यं। एवं सति स्मृ
तिस्थले बाधाभावहेतुताया आवश्यकत्वात्। तत्र परोक्षत्वस्य प्रतिबध्यतावच्छेदकत्वेनैवोपपन्नेऽप
रोक्षतत्तत्प्रकारकानुभवे तत्तत्प्रकारकज्ञानहेतुतायां निर्युक्तिकत्वात्। परंतु शाब्दबोधस्थले बाध
बुद्धेः प्रतिबंधकता न संभवति। मुखं न चंद्र इत्यादिविशेषदर्शनवतापि मुखं चंद्र इत्यादिरूपस्थले मु
खादौ चंद्राद्यभेदान्वयबोधस्योत्पादात्कल्पतादौ मिथ्याभिशापवचनाद्युधितार्थशाब्दबोधस्य स
र्वजनसिद्धत्वाच्च। न च योग्यताज्ञानहेतुतामते एवं कथं तत्र शाब्दबोधः स्यात्। बाधरूपप्रतिबंधक
सत्त्वे न योग्यताज्ञानस्यापि दुर्लभत्वादिति वाच्यं। आहार्यज्ञाने बाधस्याविरोधितया आहार्ययोग्यता
ज्ञानस्य तत्र संभवेन तन्मते शाब्दबोधोपपत्तेः न चाहार्यशाब्दबोधोपगमेनैवोपपत्तिः किं योग्यताज्ञा

श्री०
५

नहेतुत्वेनेति वाच्यं। आहार्यशाब्दबोधोपगमे परोक्षज्ञानमनाहार्यमेवेति सिद्धांतभंगप्रसंगात् वस्तुतस्तु आ
हार्यशाब्दबोधोपगमे बाधप्रतिबंधकतापाणाद्देच्छानामुत्तेजकत्वमुपगंतव्यं। तथा च शाब्देच्छाकाले बाध
मत्त्वाच्च शाब्दसामग्र्यामनुमित्याद्यापत्तिरिति अत उमितित्वावच्छिन्नं प्रति बाधबुद्धेः प्रतिबंधकत्वा
तरकल्पनमावश्यकं। एवं च शाब्दबोधस्थले शाब्देच्छाविरहविशिष्टबाधबुद्धेः प्रतिबंधकत्वस्य
पृथक्क्लृप्तत्वात्तत्र लाघवाद्योग्यताज्ञानहेतुत्वमेवोचितं। न चैवमुक्तस्थलेऽनग्योग्यताज्ञानकल्प
नया गौरवमिति वाच्या। कारणतावच्छेदकादिलाघवाद्योग्यताज्ञानहेतुत्वादिसिद्धौ तदुपपादि
कयोग्यताज्ञानव्यक्तिकल्पनागौरवस्य फलमुखत्वाददोषत्वादुभयवादिसिद्धतात्पर्यज्ञानस्यै
वयोग्यताविषयकत्वकल्पनेनातिरिक्तव्यक्तिकल्पनाभावाच्च। न च शाब्दस्थले इच्छाविरह
विशिष्टबाधबुद्धेस्तत्र प्रतिबंधकत्वं कल्प्याने चेन्न दैवोपदर्शितलाघवाद्योग्यताहेतुत्व
मायास्यतीति दैवन। प्रास्यस्त स्थले बाधाभावस्य हेतुत्वे कल्पनीये परेच्छाया उत्तेजकत्वमनभ्यु

योग्यता॰
६
6

पगमं चानाहार्यज्ञानत्वस्यैवतत्प्रतिबध्यतावध्यतावच्छेदकत्वोपगमात्।तएवोपपन्नेऽस्मनाहार्या
त्वंचस्वविषयत्वस्ववृत्तित्वकृतिमत्त्वउभयबंधेनइच्छावच्छिन्नत्वात्।स्वविषयत्वनिवेशादेकविधज्ञा
नगोचरेच्छाकालीनान्यविधज्ञानस्यनाप्रसंगइवाच्यं।एवंसतिबाधदशायांइच्छासत्वइवेच्छा
विनापिशाब्दबोधवारणायतत्रेच्छाहेतुत्वकल्पनाधिक्यप्रसंगात्।नाचाप्रामाण्यनिर्णया
भावविशिष्टयोग्यताज्ञानहेतुत्वकल्पनापेक्षयाइच्छायाहेतुत्वकल्पनेलाघवमितिवाच्यं
इच्छांविनापिबाधशून्यकालेशाब्दबोधोत्पत्त्यातत्रव्यभिचारवारणायसामानाधिकरण्य
स्वाव्यवहितोत्तरत्वोभयसंबंधेनबाधविशिष्टत्वस्येच्छाविशिष्टत्वस्यवाइच्छाजन्यतावच्छेद
ककोटाववश्यंनिवेशनीतयातत्प्रकारकत्वशाब्दत्वावच्छिन्नंप्रतिअप्रामाण्यनिर्णयाभाववि
शिष्टतत्प्रकारकज्ञानत्वेनहेतुमा।एवंलाघवाद्व्यवहितोत्तरत्वस्यजन्यादिघटितेनाननु
गमात्कदाचिदनुगताव्यवहितोत्तरत्वनिर्वचनेपिशरीरगौरवतादवस्थ्यात्।नचाहार्यप्र

श्रीः

त्यादिस्थलीयेच्छाया हेतुतयैवोपपत्तेः शाब्दस्य तदिच्छाहेतुत्वं नाधिकमिति वाच्यं। शाब्दादिगोचरेच्छा
काले। सत्यां शाब्दसामग्र्यां प्रत्यक्षादिवारणाय चाक्षुषत्वाद्यवच्छिन्नं प्रति चाक्षुषगोचरेच्छात्वादि
नैव हेतुतायावत्कल्प्य। तया शाब्दबोधगोचरेच्छायाः शाब्दबोधस्थले हेतुताधिक्यस्य दुर्वारत्वात्।
न च स्ववृत्तिप्रतियोगिकत्वसंबंधेन कृतिविशिष्टप्रागभावस्य स्वप्रतियोगिविषयकत्वसंबंधे
न वैशिष्ट्यमिच्छायां निवेशनीयमतो न शाब्दादिगोचरेच्छावत्वाच्चाक्षुषायापत्तिः तदुत्तरं शाब्द
बोधानुत्पत्तस्माएतादृशसंबंधेन कृतिविशिष्टप्रागभावस्य तदानीं शाब्देच्छायां वैशिष्ट्याविरहा
दिति वाच्यं। एतादृशकृतिविशिष्टप्रागभावविशिष्टयास्तदुत्तरक्षणे फलस्योत्पत्तिं विनानुपप
त्तेः फलोत्पत्तिपृथ्वीनातयातद्वृत्त्वे ऽन्योन्याश्रयप्रसंगात्। अथ स्वप्रतियोगिसंज्ञायविषयक
त्वसंबंधेनानादृशप्रागभाववैशिष्ट्यमिच्छायां निवेशनीयं। न च तथाविधसंबंधेन कृतिवि
षयकत्वसंबंधेनातादृशप्रागभाववैशिष्ट्यमिच्छायां निवेशनीयं। न च तथाविधसंबंधेन क

योग्यता०

१

तिविशिष्टेच्छासमवधानतादृशेच्छाफलोपधानत्व फलस्याधीनं सधर्मितावच्छेदकज्ञानस्यैवेच्छाफलतया तद्
न्नरक्षणे निर्धर्मितावच्छेदकचाक्षुषाद्युत्पन्नावपि चाक्षुषादिगोचरेच्छायामुपदर्शितसंबंधेनकाति
विशिष्टस्यतादृश धर्मितावच्छेदकचाक्षुषादिप्रागभावस्यस्वप्रतियोगितादृशचाक्षुषादिगोच
रेच्छायामुपदर्शितासंबंधेनकतिविशिष्टस्यतादृशधर्मितावच्छेदकचाक्षुषादिप्रागभावस्य स्व
प्रतियोगितादृशचाक्षुषादिसजातीयकालांतरीयसंधर्मितावच्छेदकचाक्षुषादिविषयकत्वसं
बंधेनवैशिष्टयस्यापेक्षतेः साक्षात्संच प्रत्यक्षनिष्ठमेदप्रतियोगितावच्छेदकजात्याबाध्यमितिचे
न्न। एवमपि यत्र मुखमं चंद्र इत्यतादृशबाधबुद्धिः मुखत्वावच्छिन्नविशेष्यकाभेदसंसर्गकचं
द्रप्रकारकचाक्षुषंजायतामित्याद्याकारिकाचेच्छा घटादेरनुमितिसामग्रीचतत्रनिर्धर्मितावच्छेद
कचाक्षुषस्यानुमितिसामग्रीनूपप्रतिबंधकसत्वेनोत्पादासंभवात्। धर्मितावच्छेदकचाक्षुषोत्पत्ति
विनास्वप्रतियोगिसजातीयविषयकत्वसंबंधेनतथाविषयप्रागभावाविशिष्टत्वस्येच्छायामन्

ग्री०

१

पपत्तेः तत्र विशिष्टेच्छानूपकारणसमवधानस्य फलोत्पत्त्यधीनतयाऽन्योन्याश्रयस्य दुर्वारत्वात् तत
स्मादिच्छाया विशिष्टहेतुत्वमावश्यकं एवं शाब्देच्छाविशिष्टशाब्दसामग्रीकाले बाधाभावसत्त्वेन
ह्लादिच्छाविशिष्टान्वयज्ञानापत्तिवारणाय तत्तद्धर्मावच्छिन्नं प्रति शाब्देच्छाभावहेतुताकल्पनस्या
प्याधिक्यमाहुः शाब्दमंगीकुर्वतामित्येप्यपि बाध्य. तस्माद्रूपकादिस्थलेपि आहार्ययोग्यताप्रत्य
क्षात् अताहार्यशाब्दबोधउत्पद्यत इत्येव सम्यक्॥ अथैवं वन्हिना सिंचातीत्यादावपि सेको
न वन्हिकरणक इत्येतादृशयोग्यतानिर्णयसत्त्वेऽप्याहार्ययोग्यताज्ञानाच्छाब्दबोधापत्तिरिति
चेत् इष्टापत्त एव मुखं न चंद्र इत्यादावित्येसाः । तत्राप्यर्थं विवरते भूयांसः मुखं चंद्र इत्यादि
नूपस्थले मुखं न चंद्रत्वाय योग्यतानिर्णयसत्त्वे मुखादौ न चंद्राद्यभेदान्वयबोधः परंतु
ला॥ लक्षणयोपस्थितचंद्रादिसादृश्यविशिष्टस्यैवाभेदान्वयबोधः एवं कलहादिस्थलेया

ग्यतानिर्णयदशायां मिथ्या मिशाथवचनात शाब्दबोधो न भवत्येव परन्तु पदार्थेपेस्थीति मूलकशाब्द
समानाकारकाहार्यभ्रमहानमेमेवयस्त्वितत्स्थले योग्यतानिर्णयदशायामपि शाब्दघारानुभवसि
त्त्यातदायोग्यताज्ञानहेतुत्वासिद्धिः सुतरामेवयतो योग्यताज्ञानस्यायोग्यतानिर्णयदशाब्दबो
धवारणायैव हेतुतातयमते अयोग्यतानिर्णयदशायां शाब्दबोध्यस्येष्टत्वे तु तत्र हेतुताकल्पनं नि
र्बीजमेवेति न चायोग्यतानिर्णयदशायां शाब्दबोधय आहार्ययोग्यताज्ञानसत्वएवोत्पद्यते न
तु तद्भिन्ने त्यनुभवानुरोधेन योग्यताज्ञानहेतुत्वकल्पनयावश्यकमिति वाच्यं। तादृशानुभव
एव विवादात् अन्येन तु अयोग्यतानिर्णयदशायां शापी शाब्दधी न भवतीति सर्वानुभवसिद्धमेवः
तदर्थं च शाब्दबोधं प्रति योग्यताज्ञानहेतुताकल्पने यद्यपि तादृशकरणतायाः [illegible] अधिकं अ
योग्यमानिर्णयाभावहेतुतामते उपनीतभानानुमित्यादिस्थलीयकार्यकारणभावेनैवोपप

त्वेष्वत थाप्ययोग्यता निर्णयाभावे हेतुतामसंभिन्नपिषयकप्रत्यक्षादिक्तं प्रतिशाद्बसामग्रीप्रतिबंधक
तायास्तदत्वं ताभावत्तद्धर्मदावगाहितानाविश्वयोग्यतानिर्णयाभावानां निवेशवीयतयागौरवात
योग्यताज्ञानहेतुमतमेव सम्यक।तन्मतेनादशायोग्यतानिर्णयाभावस्थाश्रेएकैकस्ययोग्यता
ज्ञानस्यैव निवेनोनीयातपालाघवात।योग्यताज्ञानहेतुत्वमनभ्युपछिता च सामग्रीप्रतिवंधकता
यावयोग्यताज्ञानंनशक्यतेनिवेशयितुं तथा सतियोग्यताज्ञानशून्यकाले सत्ययोग्यतानिर्णयशा
द्बबोधप्रत्यक्षादियागपद्यापत्तेरित्याहुः॥ ॥तदप्यकिंचित्करमेव॥ ॥अयोग्यतानिर्णयदशा
याशाद्बबोधानुत्पादस्यानुभवसित्वत्वेयोग्यताज्ञानहेतुत्ववादिवापितत्रयोग्यतानिर्णयाभाव
स्यश्रेएकैकस्ययोग्यताज्ञानस्यैव निवेनोनीयातयालाघवात।योग्यताज्ञानहेतुत्वमनभ्यु
पछिताच सामग्रीप्रतिवंधकतायांवयोग्यताज्ञानंनशक्यतेनिवेशयितुंतथा सतियोग्यताज्ञान

योग्यता०
९

शून्यकालेऽसत्ययोग्यतानिर्णयशाब्दबोधप्रत्यक्षादियोगपद्यापत्तेरित्याहुः॥ ॥तदप्यकिंचि
त्करमेव॥ ॥अयोग्यतानिर्णयशाब्दबोधप्रत्यक्षादियोगपद्यापत्तेरिदाशामाशाब्दबोधा
नुत्पादस्यानुभवसिद्धत्वे योग्यताज्ञानहेतुत्ववादिनापि तत्र योग्यतासंशयाव्यवहितोत्तरक्षणेऽस्मर
णात्मकेऽयोग्यतानिर्णयस्तदुत्तरविनश्यदवस्थयोग्यताज्ञानाच्छाब्दबोधापत्तिवारणाय योग्यतानिर्णयाभा
वोपि निवेश्यस्तथा चास्तां तावल्लाघवं तन्मते सामग्रीप्रतिबंधकतायां प्रस्तुते तत्र योग्यतानिर्णयाभावोपि निवे
श्यस्तथा चास्तां तावल्लाघवं तन्मते सामग्रीप्रतिबंधकतायां प्रस्तुते तत्र योग्यताज्ञाननिवेशाधिक्याद्गौरवमेव
।अथ तत्र जायत एव शाब्दबोधः परं तु सन्नेतत्र बाधेना प्रामाण्यं ज्ञायात एवेति चेन्न हि योग्यताज्ञानासत्त्वे स्वेत्रयो
ग्यतानिर्णयदशायां शाब्दबोधा जायत एव किं तु तत्स्थले तत्र बाधेनाप्रामाण्यं ज्ञायत इत्यस्यापि सवचत्वादलं यो
ग्यताज्ञानहेतुतया।अथ पक्षधर्मतावच्छेदकविशिष्टकयोग्यताज्ञानदशायां पदजन्यपदार्थोपस्थित्यादिरूपशा

श्री०
९

द्बबोधकारणसत्त्वे एककारणसत्त्वे एकदाप्ययोग्यतानिर्णयो नोत्पन्नः परं तु योग्यताज्ञानशून्यकाल एव तन्नायोग्य
तानिर्णयदशायां शाब्दबोधवारणाय योग्यताज्ञानहेतुत्वकल्पनमेवोचितमिति चाल्या। अन्यथाभिन्नवि
षयकप्रत्यक्षादिकं प्रति तत्तद्धर्मावच्छिन्नविशेष्यकशाब्दबोधसामग्र्याः प्रतिबन्धकत्वे नानाविधबाधाद्य
भावनिवेशप्रसंगेन गौरवात् तदयोग्यताज्ञानस्यायोग्यतानिर्णयस्य वा सत्त्वे भवन्मते शाब्दबोधोत्पत्त्याभिन्न
विषयकप्रत्यक्षाद्यनुदयेन भवतां तत्र बाधाभावपूरित्यस्यायोग्यताज्ञानस्य निवेशयितुमशक्यत्वादिति
चेत्। अत्रायातु तावदेवं तादृशायुत्पत्तौ तादृशधर्मावच्छिन्नविशेष्यकशाब्दबोधं प्रति योग्यताज्ञानस्य हेतु
ता एवमायेऽन्यधर्मावच्छिन्नशाब्दबोधे तस्य तथात्वे निष्प्रामाणिकमेवानेन तादृशधर्मावच्छिन्नविशेष्य
कयोग्यताज्ञानकाले पदजन्यपदार्थोपस्थित्यादिसत्त्वे कदाप्ययोग्यतानिर्णयो नोत्पन्नस्तादृशधर्माणा
मेवानात्मत। तत्र योग्यताज्ञानहेतुतायां विशेष्यतावच्छेदकनिवेशकार्यकारणभावानन्त्यं। अत तत्तद्धर्मनिवे
श्ये विशेष्यतावच्छेदकत्वप्रत्यासत्त्यैव तद्योग्यताज्ञानहेतुत्वं कल्पयितुमुचितं तथा चान्यधर्मावच्छिन्नवि

शेष्यकशाब्दबोधेऽपियोग्यताज्ञानहेतुत्वमायातमितिवाच्यं। विशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्यासर्वसाधारणेन
नयोग्यताज्ञानहेतुत्वोपगमेपारस्पर्याध्वंसावच्छिन्नविशेष्यकशाब्दबोधंप्रतियोग्यताज्ञानस्य योग्यताज्ञान
दशायांपदजन्यपदार्थोपस्थित्यादिसत्त्वेकदाचिदयोग्यतानिर्णयोत्पन्नः तादृशध्वंसावच्छिन्नविशे
ष्यकशाब्दबोधसामग्र्याभिन्नविषयकप्रत्यक्षादिप्रतिबंधकतायांबाधाभावयोग्यताज्ञानयोरुभयोर्वि
श्वेशनगौरवसंपादकः। परंतुतथासतियोग्यताज्ञानशून्यकालीनामिच्छानांयोग्यताज्ञानवेशकत्वेपि
स्वातंत्र्येणानुत्तेजकतयागौरवानवकाशात्योग्यताज्ञाननिवेशप्रयुक्तगौरवस्यभवन्मतेपिदुर्वारत्वा
त्। अत्रोच्यते। योग्यताज्ञानस्यशाब्दधीहेतुत्वेपयःकरणकत्वाभाववत्सेकीयाकृतिरित्याकारिकायां
विशेष्यमिति। सामानाधिकरण्योपपत्त्यासिवती त्याद्याकारकशाब्दसामग्र्याःप्रतिबंधकत्वंनकल्प्य
तइतिलाघवांसिकःपयःकरणकोनवेत्याकारकसंशयानंतरंतादृशबोधवारणायतत्रसंशयस्यप्र
तिबंधकत्वमावश्यकमिति। विवेचितंचेदंविशिष्टवैशिष्ट्यविचारे। एवंचतत्रलाघवात्संशयनिर्ण

यसाधारणसेकत्वावच्छिन्नविशेष्यकपयःकरणत्वाभावप्रकारकज्ञानत्वेऽपिनैवप्रतिबंधकताकल
प्यते। तथोपदर्शितमानसादौ यस्यसांसिंचतीत्याद्युपदर्शितसामग्र्याःप्रतिबंधकत्वाकल्पनप्रयुक्त
लाघवंदुर्वारमेव। यदि च संशयकालेपि विशेष्यविशेषणमितिरित्याज्ञानोत्पत्तिस्वीकारात् शाब्दबो
धेतथाविधसंशयस्यप्रतिबंधकत्वंनकल्प्यतेतथापितादृशमानसतथाविधशाब्दबोधसामग्र्याःप्रति
बंधकत्वाकल्पनप्रयुक्तलाघवंदुर्वारमेवतथाहितादृशसामग्रीकालेसेकत्वावच्छिन्नविशेष्यकत्वप्र
कारकविपरीतज्ञानसत्तायाएवावश्यकत्वाद्विपरीतज्ञानोत्तरमस्यक्षेहेतुभूतविशेषदर्शनस्यानिरहेण
वनतादृशमानसापत्तिःसंभवति। सेकोनपयःकरणकइत्यादिप्रत्यक्षजनकीभूतविशेषदर्शनस्यविरहे
णैवनतादृशत्सेकत्वावच्छिन्नविशेष्यकपयःकरणकत्वाद्यभावव्याप्यवत्तानिर्णयरूपविशेषदर्शनस
त्वेचसेकत्वाद्यवच्छिन्नविशेष्यकःपयःकरणकत्वादिप्रकारकोपदर्शितशाब्दसामग्र्येवनास्ति। नच संश
यविशेषदर्शनस्याहेतुतयायोग्यतासंदेहघटितोपदर्शितशाब्दबोधसामग्रीदशायांसेकत्वावच्छि

वाच्यं २ नं० १३२३

न्नविशेष्यकपयःकरणकत्वाद्यभावप्रकारकसंशयवारणायोपदर्शितसामग्रीप्रतिबंधकत्वकल्पनमा
वश्यकमितिसिकत्वाद्यवच्छिन्नतिविशेष्यकपयःकरणकत्वादिमानसिताहशसामग्रीप्रतिबंधकताया
उभयत्रसिद्धतयासिकत्वादिविशिष्टेपयःकरणकत्वाभावासंभवेनपयःकरणकत्वाद्यभावप्रकारक
मानसेतुपदर्शितसामग्र्याःप्रतिबंधकत्वेपिताहशसामग्रीकालेसंशयोत्पसंभवात्। नचविपरी
तज्ञानोत्तरप्रत्यक्षोविशेषदर्शनहेतुनामित्थंवैवउपदर्शितसामग्रीप्रतिबंधकतात्रुटिप्रयुक्तला
घवसंभवान्नदेवासिद्धमितिवाच्यंउपदर्शितलाघवबलेनैवतस्यापिसिद्धेः विवेचितंबाधविचारे
माम्हद्वाविपरीतज्ञानोत्तरप्रत्यक्षेविशेषदर्शनंहेतुः इममपियोग्यताज्ञानहेतुतानयेयोग्यताज्ञाना
भावप्रकारकासकविशेष्यकमानसप्रत्यक्षेशाब्दसामग्रीप्रतिबंधकत्वाकल्पनमपुलाघवं॥ ॥इ
तियोग्यताज्ञानस्यशाब्दप्रतिकारणत्वविचारः॥ ॥शंवत१८३३

दि३

श्री०
११